**CCE RF/PF/RR/PR/NSR/NSPR(A)/666/054**

Question Paper Serial No.

# A

**ಮಾರ್ಚ್/ಏಪ್ರಿಲ್ 2024 ರ ಪರೀಕ್ಷೆ – 1**

**MARCH/APRIL 2024 EXAMINATION-1**

ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 12 ]
Total No. of Printed Pages : 12 ]
ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 38 ]
Total No. of Questions : 38 ]

**ಸಂಕೇತ ಸಂಖ್ಯೆ : 67-S**
**Code No. : 67-S**

**CCE RF/PF/RR/ PR/NSR/NSPR FULL SYLLABUS**

## ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ — ಸಂಸ್ಕೃತ

## Subject : Third Language — SANSKRIT

## तृतीयभाषा — संस्कृतम्

**(ಶಾಲಾ ಅಭ್ಯರ್ಥಿ / ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / ಶಾಲಾ ಪುನರಾವರ್ತಿತ ಅಭ್ಯರ್ಥಿ / ಖಾಸಗಿ ಪುನರಾವರ್ತಿತ ಅಭ್ಯರ್ಥಿ / ಎನ್.ಎಸ್.ಆರ್. / ಎನ್.ಎಸ್.ಪಿ.ಆರ್.)**

**(Regular Fresh / Private Fresh / Regular Repeater / Private Repeater / NSR / NSPR)**

ದಿನಾಂಕ : 04. 04. 2024 ] [ Date : 04. 04. 2024

ಸಮಯ : ಬೆಳಗ್ಗೆ 10-15 ರಿಂದ ಮಧ್ಯಾಹ್ನ 1-15 ರವರೆಗೆ ] [ Time : 10-15 A.M. to 1-15 P.M.

ಗರಿಷ್ಠ ಅಂಕಗಳು : 80 ] [ Max. Marks : 80

**Cut here/ಇಲ್ಲಿ ಕತ್ತರಿಸಿ**

***ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ಒಟ್ಟು 38 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ***ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ (ಬಾಣವನ್ನು ಅನುಸರಿಸಿ), ಎಡಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಬೇಡಿ.*** ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ಸೂಚಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ನೀಡಲಾಗಿದೆ.
6. ನಿಮಗೆ ವಿತರಿಸಲಾಗಿರುವ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಆವೃತ್ತಿ ( Version ) ಮತ್ತು ನಿಮ್ಮ ಪ್ರವೇಶ ಪತ್ರದಲ್ಲಿ ಮುದ್ರಿತವಾಗಿರುವ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಆವೃತ್ತಿ ಒಂದೇ ಆಗಿರುವುದನ್ನು ಖಾತರಿಪಡಿಸಿಕೊಳ್ಳಿ.

***परीक्षार्थिनां सामान्यसूचना:***

1. अस्मिन् प्रश्नपत्रे अष्टत्रिंशत् (38) प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । **परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत (तीर निशानं अनुसराणि) । प्रश्नपत्रमुद्घाटयितुं वामपार्श्वेन मा कर्तयत ।** प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति अवलोकयत ।
3. प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।
6. भवद्भ्यः प्रदत्ता प्रश्नपत्रस्य आवृत्तिः ( Version ) तथा भवतां प्रवेशपत्रे मुद्रित–प्रश्नपत्रस्य आवृत्तिः च समाना वा इति पर्यवलोकयत ।

SANSKRIT



छृतः कर्तयत

**04. 04. 2024**

**TEAR HERE TO OPEN THE QUESTION PAPER**
प्रश्नपत्रमुद्घाटयितुमत्र कर्तयत

**Tear here**

**I.** **अधोलिखितप्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत ।** **8 × 1 = 8**

1. 'जनकः' अस्य पर्यायपदम् इदं भवति ।

   (A) पिता (B) माता

   (C) पुत्रः (D) पुत्री

2. 'प्रश्नान्' अत्र एषः लिङ्गः भवति ।

   (A) पुल्लिङ्गः (B) स्त्रीलिङ्गः

   (C) नपुंसकलिङ्गः (D) अन्यलिङ्गः

3. 'एकः' अस्य विरुद्धार्थकपदम् इदं भवति ।

   (A) एकः (B) अनेकः

   (C) भिन्नः (D) नूतनम्

4. 'गच्छ' अत्र एषः लकारः भवति ।

   (A) लट् लकारः (B) लोट् लकारः

   (C) लङ् लकारः (D) लृट् लकारः

5. 'प्रेषयति' अत्र एषः पुरुषः वर्तते ।

(A) प्रथमपुरुषः (B) मध्यमपुरुषः

(C) उत्तमपुरुषः (D) अन्यपुरुषः

6. 'भवदीयः' अस्य विवरणम् एवं भवति ।

(A) भवतां त्वम् (B) भवतां वयम्

(C) भवताम् अयम् (D) भवतां दीयः

7. ''बालकः पठति'' । अत्र रेखाङ्कितपदस्य कारकम् इदं भवति ।

(A) कर्मकारकम् (B) करणकारकम्

(C) सम्प्रदानकारकम् (D) कर्तृकारकम्

8. ''अहं पत्रं लिखन् अस्मि' । अत्र कृदन्तपदम् इदं भवति ।

(A) अहम् (B) पत्रम्

(C) लिखन् (D) अस्मि

**II. चतुर्थं पदं लिखत ।** 4 × 1 = 4

9. दशकण्ठः — रावणः :: जानकी — ................... ।

10. देहरक्षा — कवचकुण्डलानि :: महत्तरा — ................... ।

11. शिक्षा कालपर्ययात् — क्षयं गच्छति :: हुतं च दत्तं च — ................... ।

12. परम्परा — सम्प्रदायः :: अशनम् — ................... ।

**III. एकवाक्येन उत्तरं लिखत ।** 4 × 1 = 4

13. वामनः किमर्थं विरामम् इच्छति ?

14. केषां मध्ये भीषणं युद्धं प्रचलति स्म ?

15. चम्पूरामायणस्य कर्ता कः ?

16. के शैशवे अभ्यस्तविद्याः आसन् ?

**IV.** **द्वित्रैः वाक्यैः उत्तरं लिखत ।** **4 × 2 = 8**

17. मेलुकोटे क्षेत्रस्य नामान्तराणि कानि ?

18. अर्जुनः कृष्णं किम् अपृच्छत् ?

19. गणेशः कीदृशः ?

20. पञ्च अचोरहरणीयानि कानि ?

**अथवा**

कालान्तरे कानि विनश्यन्ति ?

**V.** **संस्कृतभाषया अनुवादं कुरुत ।** **1 × 2 = 2**

21. ಇಂದು ರವಿವಾರ. ಶಾಲೆಗೆ ವಿರಾಮವಿದೆ. ನಾಳೆ ಸೋಮವಾರ, ನಾವು ಶಾಲೆಗೆ ಹೋಗುವೆವು.

Today is Sunday, it is a holiday. Tomorrow is Monday, we go to school.

**VI. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 × 2 = 2**

22. वयं प्रतिदिनं शालां गच्छामः । तत्र संस्कृतमपि पठामः ।

**VII.** 23. **विग्रहवाक्यं लिखत ।** **1 × 2 = 2**

a) उपवृक्षम् ।

b) शूलपाणिः ।

**अथवा**

**समस्तपदं लिखत ।**

a) दिनं दिनम् = ...................

b) 'लम्बम् उदरं यस्य सः = ...................

**VIII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत ।** **1 × 2 = 2**

24. ''सोमदत्तः अभिमन्युः इव शूरः'' ।

**IX. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **2 × 3 = 6**

25. ''गच्छ अद्य अहं पुस्तकं न दास्यामि'' ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

26. ''सागर इव तिष्ठतु ते यशः'' ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

**X.** 27. **सन्धिं विभज्य नाम लिखत ।** **1 × 3 = 3**

a) बालस्तत्र ।

b) पत्रालयः ।

c) गुरुर्देवः ।

**XI. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 × 3 = 3**

28. प्रस्थादुदस्थात् प्रथमानवेगः ।

**XII. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत।** **1 × 3 = 3**

29. महर्षिः वेदव्यासः ।

**अथवा**

'कालिदासः' ।

**XIII. पद्यपाठस्य नाम विलिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत।** **3 × 3 = 9**

30. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ।।

31. तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्दुः इन्दुः क्षीरनिधाविव ।।

32. अशनं भिन्नं वसनं भिन्नं
रूपं भिन्नं रीतिरपि ।
भिन्नं भाग्यं भिन्नो वर्णः
भिन्नं सर्वं भेददृशे ।।

**XIV. पद्यपाठस्य नाम विलिख्य पद्यं पूरयत ।** **1 × 3 = 3**

33. शारदा ........................................................................

........................................................................ क्रियात् ।।

**XV. दशवाक्यैः उत्तरं कर्नाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत ।**

**2 × 4 = 8**

34. संस्कृतग्रामस्य वैशिष्ट्यं वर्णयत ।

35. भारतस्य आदर्शनारी ''उभयभारती'' इति विषयं सङ्गृह्य लिखत ।

**अथवा**

''विक्रमः वेतालश्च'' इति कथां सङ्गृह्य लिखत ।

**XVI. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 × 4 = 4**

36. व्यवहारस्य प्रमुखं साधनं भाषा । भाषया ज्ञानं वर्धते । विश्वस्मिन् सहस्राधिकाः भाषास्सन्ति । तासु संस्कृतभाषा अन्यतमा । संस्कृतस्य देववाणी, गीर्वाणवाणी,

भारती इत्यादीनि नामानि सन्ति । संस्कृतभाषा सुलभा मधुरा च वर्तते । भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती ।

**प्रश्नाः**

i) भाषया किं वर्धते ?

ii) संस्कृतस्य नामानि कानि सन्ति ?

iii) संस्कृतभाषा कीदृशी वर्तते ?

iv) भाषासु मुख्या मधुरा दिव्या का ?

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 × 4 = 4**

37. परिसरः ।

**अथवा**

संस्कृतभाषायाः गरिमा ।

**XVIII. पत्रं लिखत ।** **1 × 5 = 5**

38. हासनमण्डलस्य सर्वकारीयविद्यालयस्य छात्रः/छात्रा इति मत्वा दिनचतुष्टयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति पत्रं लिखत ।

**अथवा**

शिवमोग्गामण्डलस्य सर्वकारीयविद्यालयस्य छात्रः/छात्रा इति मत्वा अध्ययनविषये बेङ्गलूरुनगरे वर्तमानं मित्रं प्रति पत्रं लिखत ।

DO NOT WRITE ANYTHING HERE